This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५८

॥श्रीगणेशायनमः॥ श्रीहरिंपरमानंदमुपदेष्टारमीश्वरं॥ व्यापकंसर्वलोकानांकारणंतंनमाम्य
हं॥१॥ अपरोक्षानुभूतिर्वै प्रोच्यतेमोक्षसिद्धये॥ सद्भिरेवप्रयत्नेनवीक्षणीयामुहुर्मुहुः॥२॥ स्वव
र्णाश्रमधर्मेणतपसाहरितोषणात्॥ साधनंप्रभवेत्पुंसांवैराग्यादिचतुष्टयं॥३॥ ब्रह्मादिस्था
वरांतेषुवैराग्यंविषयेष्वनु॥ यथैवकाकविष्टायांवैराग्यंतद्धिनिर्मलं॥४॥ नित्यमात्मस्वरूपंहि
दृश्यंतद्विपरीतगं॥ एवंयानिश्चयःसम्यक्विवेकोवस्तुनःसवै॥५॥ सदैववासनात्यागःश
मोयमितिशब्दितः॥ निग्रहोबाह्यवृत्तीनांदमइत्यभिधीयते॥६॥ विषयेभ्यःपरावृत्तिःपरमो
परतिर्हिसा॥ सहनंसर्वदुःखानांतितिक्षासाशुभामता॥७॥ निगमाचार्यवाक्येषुभक्तिःश्र
द्धेतिविश्रुता॥ चित्तैकाग्र्यंतुसल्लक्ष्येसमाधानमितिस्मृतं॥८॥ संसारबंधनिर्मुक्तिःकथंस्या
न्मेकदाविधे॥ इतियासुदृढाबुद्धिर्वक्तव्यासामुमुक्षुता॥९॥ उक्तसाधनयुक्तेनविचारःपुरुषेण
हि॥ कर्तव्योज्ञानसिद्ध्यर्थमात्मनःशुभमिच्छता॥१०॥ नोत्पद्यतेविनाज्ञानंविचारेणान्यसाध
नैः॥ यथापदार्थभानंहिप्रकाशेनविनाक्वचित्॥११॥ कोहंकथमिदंजातंकोवैकर्तास्यविद्यते

Checked 2012

Acc. No:- ~~1476~~ M1006
Title:- अपरोक्षानुभव
Author:- परिव्राजकाचार्य
Subject:- वेदांत
पत्र:- 8

K K S U LIBRARY
RAMTEK
441 106
M1096
Dist Nagpur

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपादानंकिमस्तीह विचारः सोयमीदृशः ॥१२॥ नाहंभूतगणोदेहो नाहंचाक्षगणस्तथा ॥ एतद्वि
लक्षणःकश्चिन्नु विचारः सोयमीदृशः ॥१३॥ अज्ञानप्रभवंसर्वं ज्ञानेनप्रविलीयते ॥ संकल्पो
विविधःकर्ता विचारः सोयमीदृशः ॥१४॥ एतयोर्यदुपादानंएकंसूक्ष्मंसदव्ययं ॥ यथैवमृ
त्घटादीनां विचारः सोयमीदृशः ॥१५॥ अहमेकोपिसूक्ष्मश्च ज्ञातासाक्षिसदव्ययं ॥ तद
हंनात्रसंदेहो विचारः सोयमीदृशः ॥१६॥ आत्मातुनिष्कलोह्येको देहोबहुभिरावृतः ॥ तयो
रैक्यंप्रपश्यंतिकिमज्ञानमतःपरं ॥१७॥ आत्मानियामकश्चांतर्देहोनियम्यबाह्यकः ॥ त
योरैक्यं ॥१८॥ आत्माज्ञानमयःपुण्यो देहोमांसमयोशुचिः ॥ तयोरैक्यं ॥१९॥ आत्माप्रकाशकः — गरामा। ॥१२॥
स्वच्छो देहस्तामसउच्यते ॥ तयोरैक्यं ॥२०॥ आत्मानित्योहिसद्रूपो देहोनित्योह्यसन्मयः ॥
तयोरैक्यं ॥२१॥ आत्मनःस्वप्रकाशत्वंयत्पदार्थावभासनं ॥ नाग्न्यादिदीप्तिवद्दीप्तिर्भव
त्यंधोयतोनिशि ॥२२॥ देहोहमित्ययंमूढोधृत्वातिष्ठत्यहोजनः ॥ ममायमित्यपिज्ञात्वा
घटद्रष्टेवसर्वदा ॥२३॥ ब्रह्मैवाहंसमःशांतःसच्चिदानंदलक्षणः ॥ नाहंदेहोह्यसद्रूपोज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमि तुभ्यं ते बुधैः ॥२४॥ निर्विकारो निराकारो निरवद्यो हमव्ययः ॥ नाहं देहो ॥२५॥ निरामयो
निराभासो निर्विकल्पो हमाततः ॥ नाहं दे० ॥२६॥ निर्गुणो निष्कलो नित्यो नित्यमुक्तो हमच्यु
तः ॥ नाहं दे० ॥२७॥ निर्मलो निश्चलो नंतः शुद्धो हमजरो मरः ॥ नाहं दे० ॥२८॥ स्वदेहं शोभनं
त्यक्त्वा पुरुषाख्यं च संमतं ॥ किं मूर्ख शून्यमात्मानं देहातीतं करोषि भो ॥२९॥ उत्तरं ॥ स्वात्मा
नं शृणु मूर्ख त्वं श्रुत्या युक्त्या च पौरुषं ॥ देहातीतं सदाकारं सुदुर्दर्शं भवादृशैः ॥३०॥ अहं श
ब्दे न विख्यातो एक एव स्थितः परः ॥ स्थूलस्त्वनेकतां प्राप्तः कथं स्याद्देहकः पुमान् ॥३१॥
अहं द्रष्टृतया सिद्धो देहो दृश्यतया स्थितः ॥ ममायमिति निर्देशात् कथं स्याद्देहकः पु
मान् ॥३२॥ अहं विकारहीनस्तु देहो नित्यं विकारवान् ॥ इति प्रतीयते साक्षात् कथं स्या० ॥३३॥
यस्मात्परमिति श्रुत्या तया पुरुषलक्षणं ॥ विनिर्णीतं विमूढेन कथं स्या० ॥३४॥ असंगः पुरु
षः प्रोक्तो बृहदारण्यकेपि च ॥ अनंतमलसंश्लिष्टः कथं स्या० ॥३५॥ तत्रैव च समाख्यातः
स्वयंज्योतिर्हि पूरुषः ॥ जडः परप्रकाश्यो सौ कथं० ॥३६॥ प्रोक्तो पि कर्मकांडेन ह्यात्मा देहा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विलक्षणः॥ नित्यश्च तत्फलं कृत्स्नं देहपातादनंतरं॥२७॥ लिंगं चानेकसंयुक्तं चलं दृश्यं विका
रि च॥ अव्यापकमसद्रूपं तत्कथं स्यात्पुमानयं॥२८॥ एवं देहद्वयादन्य आत्मा पुरुष ईश्व
रः॥ सर्वात्मा सर्वरूपश्च सर्वातीतोहमव्ययः॥२९॥ इत्यात्मदेहभावेन प्रपंचस्यैव सत्यता
तथोक्ता तर्कशास्त्रेण किं ततः पुरुषार्थता॥४०॥ इत्यात्मदेहभेदेन देहात्मत्वं निवारितं॥ इदा
नीं देहभेदस्य ह्यसत्वं स्फुटमुच्यते॥४१॥ चैतन्यस्यैकरूपत्वात् भेदो युक्तो न कर्हिचित्॥ जी ॥राम॥
वत्वं च मृषा ज्ञेयं रज्ज्वां सर्पग्रहो यथा॥४२॥ रज्ज्वज्ञानक्षणेनैव यद्वद्रज्जुर्हि सर्पिणी॥ ॥१३२॥
भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला॥४३॥ उपादानं प्रपंचस्य ब्रह्मणोन्यन्न वि
द्यते॥ तस्मात्सर्वप्रपंचोयं ब्रह्मैवास्ती न चेतरत्॥४४॥ व्याप्यव्यापकता मिथ्या सर्वमा
त्मेति शासनात्॥ इति ज्ञाते परे तत्वे भेदस्यावसरः कुतः॥४५॥ श्रुत्या निवारितं नूनं ना
नात्वं स्वमुखेन हि॥ कथं भासो भवेदन्यः स्थिते चाद्वयकारणे॥४६॥ दोषोपि विहितः श्रु
त्या मृत्योर्मृत्युं स गच्छति॥ इह पश्यति नानात्वं मायया वंचितो नरः॥४७॥ ब्रह्मणः सर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतानि जायंते परमात्मनः ॥ तस्मादेतानि ब्रह्मैव भवंतीत्यवधारयेत् ॥४८॥ ब्रह्मैव सर्वनामानि
रूपाणि विविधानि च ॥ कर्माण्यपि समग्राणि बीभर्तीति श्रुतिर्जगौ ॥४९॥ सुवर्णाज्जायमानस्य
सुवर्णत्वं च शाश्वतं ॥ ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ॥५०॥ स्वल्पमप्यंतरं कृत्वा जी
वात्मपरमात्मनो ॥ यः संतिष्ठति मूढात्मा भयं तस्याभिभाषितं ॥५१॥ यथाज्ञानाद्भवेद्वैतमि
तरं तस्य पश्यति ॥ आत्मत्वेन यदा सर्वं नेतरं तत्र पश्यति ॥५२॥ यस्मिन्सर्वाणि भूतानि ह्या
त्मत्वेन विजानतः ॥ नैव तस्य भवेन्मोहो न च शोको द्वितीयतः ॥५३॥ अयमात्मा हि ब्रह्मैव स
र्वात्मकतया स्थितः ॥ इति निर्धारितं श्रुत्या बृहदारण्यसंस्थया ॥५४॥ अनुभूतोप्ययं
लोको व्यवहारक्षमोपि सन् ॥ असद्रूपो यथा स्वप्न उत्तरक्षणबाधितः ॥५५॥ स्वप्नोपि जा
गरे लीनः स्वप्ने नापि जागरो नहि ॥ द्वयमेव लयेनास्ति लयोपि ह्युभयोर्न च ॥५६॥ त्रयमेव
भवेन्मिथ्या गुणत्रयविनिर्मितं ॥ अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ॥५७॥ य
द्वन्मृदि घटभ्रांतिः शुक्तौ वा रजतस्थितिः ॥ यद्वद्ब्रह्मणि जीवत्वं वीक्ष्यमाणे प्रणश्यति ॥५८॥

६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथावद्विघटो नाम कनके कुंडलाभिदा। शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथापरे॥५९॥ य
थैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले। पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि॥६०॥ यथै
व शून्ये वेतालो गंधर्वाणां पुरं यथा। यथाकाशे द्विचंद्रत्वं तद्वत्सत्ये जगत्स्थितिः॥६१॥ य
था तरंगकल्लोलैर्जलमेव स्फुरत्यलं। पात्ररूपेण ताम्रं हि ब्रह्मांडौघैस्तथात्मता॥६२॥ घ
टनाम्ना यथा पृथ्वी पटनाम्ना हि तंतवः। जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः॥६३॥ ॥राम॥
सर्वोपि व्यवहारस्तु ब्रह्मणा क्रियते जनैः। अज्ञानान्न विजानंति मृदेव हि घटादिका ॥१३३॥
॥६४॥ कार्यकारणता नित्यमास्ते मृद्घटयोर्यथा। तथैव श्रुतियुक्तिभ्यां प्रपंचब्रह्मणो
रिह॥६५॥ अपश्यमाणे घटे यद्वन्मृत्तिका भाति वै बलात्। वीक्षमाणे प्रपंचेपि ब्रह्मैवाभा
ति भास्वरं॥६६॥ स देवात्मा विशुद्धोस्ति त्वशुद्धो भाति वै सदा। यथैव द्विविधा रज्जुर्ज्ञानिनो
ज्ञानिनो निशं॥६७॥ कुंभो यथैव मृण्मयस्तद्वद्देहोपि चिन्मयः। आत्मानात्मविभागोयं मु
धैव क्रियते बुधैः॥६८॥ सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका। विनिर्णीता विमूढेन देहत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तथात्मता ॥ ६९ ॥ घटत्वेन यथा पृथ्वी पटत्वेनैव तंतवः ॥ विनिर्णिता ॥ ७० ॥ पुरुषत्वेन वै स्था
णुर्जलत्वेन मरीचिका ॥ विनिर्णि ॥ ७१ ॥ कनकं कुंडलत्वेन तरंगत्वेन वै जलं ॥ विनिर्णि ॥ ७२ ॥
गृहत्वेनैव काष्ठानि खड्गत्वेनैव लोहता ॥ विनिर्णि ॥ ७३ ॥ यथा वृक्षविपर्यासो जलाद्भवति क
स्यचित् ॥ तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७४ ॥ पोतेन गच्छतः पुंसः सर्वं भातीवि
चंचलं ॥ तद्वदात्म ॥ ७५ ॥ पीतत्वं हि यथा शुभ्रे दोषाद्भवति कस्यचित् ॥ तद्वदात्म ॥ ७६ ॥ च
क्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकं ॥ तद्वदात्म ॥ ७७ ॥ अलातं भ्रमणेनैव वर्तुलं
भाति सूर्यवत् ॥ तद्वदात्म ॥ ७८ ॥ महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः ॥ तद्वदात्म ॥ ७९ ॥
सूक्ष्मत्वे सर्वभावानां स्थूलत्वं चोपनेत्रतः ॥ तद्वदात्म ॥ ८० ॥ काचभूमौ जलत्वं वा जलत्वे
भूमैहि काचता ॥ तद्वदात्म ॥ ८१ ॥ यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुमान् ॥ तद्वदात्म ॥
॥ ८२ ॥ यथैव दिक्विपर्यासो मोहाद्भवति कस्यचित् ॥ तद्वदात्म ॥ ८३ ॥ अभ्रे सु सत्सु धा
वत्सु सोमो धावति भातिवै ॥ तद्वदात्म ॥ ८४ ॥ यथा शशिजले भ्रांतिश्चंचलत्वेन कस्यचि

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मातद्दात्मः॥८५॥ एवमात्मन्यविज्ञाते देहाध्यासो हि जायते॥ स एवात्मपरिज्ञानाल्लीयते च प
रात्मनि॥८६॥ सर्वमात्मतया ज्ञातं जगत्स्थावरजंगमं॥ अभावात्सर्वभावानां देहानां चात्मता
कुतः॥८७॥ आत्मानं सततं जानन्कालं नयं महद्युते॥ प्रारब्धमखिलं भुंजन्नोद्वेगं कर्तुम
र्हसि॥८८॥ उत्पन्नेप्यात्मविज्ञाने प्रारब्धं नैव मुंच्यति॥ इतियच्छ्रुयते शास्त्रे तन्निराक्रि
यतेधुना॥८९॥ तत्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते॥ देहादीनामसत्वात्तु यथा स्वप्नो वि
बोधतः॥९०॥ कर्मजन्मांतरीयं यत्प्रारब्धमिति कीर्तितं॥ तत्तु जन्मांतराभावात्पुंसो नै ॥राम॥
वास्ति कर्हिचित्॥९१॥ स्वप्नदेहो यथाध्यस्तस्तथैवायं हि देहकः॥ अध्यस्तस्य कुतो जन्म ॥१३४॥
जन्माभावे हि तत्कुतः॥९२॥ उपादानं प्रपंचस्य मृद्भांडस्येव पश्यतः॥ अज्ञानं चेति वेदां
तैस्तस्मिन्नष्टे क्व विश्वता॥९३॥ यथा रज्जुं परीत्यज्य सर्पं गृह्णाति वै भ्रमात्॥ तद्वत्सत्य
मविज्ञाय जगत्पश्य[illegible] मूढधीः॥९४॥ रज्जुरूपे परिज्ञाते सर्पखंडं न तिष्ठति॥ अधिष्ठा
ने तथा ज्ञाते प्रपंचः शून्यतां गतः॥९५॥ देहस्यापि प्रपंचत्वात्प्रारब्धावस्थितिः कुतः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अज्ञानजनबोधार्थं प्रश्चं वक्ति वै श्रुतिः ॥ ९६ ॥ क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ब
हुत्वं तं निषेधार्थं श्रुत्या गीतं तु यत्स्फुटं ॥ ९७ ॥ भिद्यंते हृदयग्रंथिश्छिद्यंते सर्वसंशयः ॥ क्षी
यंते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ९८ ॥ अव्यक्तेऽनन्तवस्तुन्येव तत्त्वदानार्थद्वयागमः ॥ वे
दांतमतहानं च यतो ज्ञानमिति श्रुतिः ॥ ९९ ॥ त्रिपंचांगान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये ॥ तै
श्च सर्वैः सदा कार्यं निदिध्यासनमेव तत् ॥ १०० ॥ नित्याभ्यासादृते प्राप्तिर्न भवेत् सच्चिदा
त्मनः ॥ तस्माद् ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरं ॥ १०१ ॥ यमो हि नियमस्त्यागो मौनं दे
शश्च कालतः ॥ आसनं मूलबंधश्च देहसाम्यं च दृक्स्थितिः ॥ २ ॥ प्राणसंयमनं चैव प्रत्याहा
रश्च धारणा ॥ आत्मध्यानं समाधिश्च प्रोक्तान्यंगानि वै क्रमात् ॥ ३ ॥ सर्वं ब्रह्मेति वै ज्ञानादिंद्रि
यग्रामसंयमः ॥ यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥ ४ सजातीयप्रवाहश्च विजाति
यतिरस्कृतिः ॥ नियमो हि परानंदो नियमात् क्रियते बुधैः ॥ ५ ॥ त्यागः प्रपंचरूपस्य चिदात्म
त्वावलोकनात् ॥ त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः ॥ ६ ॥ यस्माद्वाचो निवर्तंते अप्रा

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थमनसासह। यन्मौनंयोगिभिर्गम्यं तद्भजेत्सर्वदाबुधेः॥७॥ वाचोयस्मान्निवर्त्तंते तद्वक्तुंके
नशक्यते। प्रपंचोयदिवक्तव्यः सोपिशब्दविवर्जितः॥८॥ इतिवातद्भवेन्मौनंसतांसहजसंज्ञि
तं। गिरामैनंतुबालानांप्रयुक्तंब्रह्मवादिभिः॥९॥ आदावंतेचमध्येच जनोयस्मिन्नविद्यते
येनेदंसततंव्याप्तंसदेशोविजनस्मृतः॥१०॥ कलनात्सर्वभूतानां ब्रह्मादीनांविशेषतः
कालशब्देननिर्दिष्टो ह्यखंडानंदमद्वयः॥११॥ सुखेनैवभवेद्यस्मिन्नजस्रंब्रह्मचिंतनं। आ
सनंतद्विजानीयान्नेतरत्सुखनाशनं॥१२॥ सिद्धंयत्सर्वभूतादि विश्वाधिष्ठानमव्ययं। ॥राम॥
यस्मिन्सिद्धाः समाविष्टास्तद्वै सिद्धासनंभवेत्॥१३॥ यन्मूलंसर्वभूतानांयन्मूलंचित्त ॥१२५॥
बंधनं। मूलबंधःसदासेव्यो योग्योसौराजयोगिनां॥१४॥ अंगानांसमतांविद्यात्समेब्र
ह्मणिलीयते। नोचेन्नैवसमानत्वमृजुत्वंशुष्कवृक्षवत्॥१५॥ दृष्टिंज्ञानमयींकृत्वापश्ये
द्ब्रह्ममयंजगत्। सादृष्टिःपरमोदारानना साग्रविलोकिनी॥१६॥ दृष्टिर्दर्शनदृश्यानांविरा
मोयत्रवाभवेत्। दृष्टिस्तत्रैवकर्त्तव्यानना साग्रविलोकिनी॥१७॥ चित्तादिसर्वभावेषुब्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्मत्वेनैवभावनात् ॥ विरोधःसर्ववृत्तीनांप्राणायामःसउच्यते ॥१८॥ निषेधनंप्रपंचस्यरेच
काख्यःसमीरणः ॥ ब्रह्मैवास्मीतियावृत्तिःपूरकोवायुरीरितः ॥१९॥ ततःसद्वृत्तिनैश्चल्यंकुंभ
कःप्राणसंयमः ॥ अयंचापिप्रबुद्धानामज्ञानांघ्राणपीडनम् ॥२०॥ विषयेष्वात्मतांदृष्ट्वाम
नसश्चित्तमज्जनं ॥ प्रत्याहारःसविज्ञेयोभ्यसनीयोमुमुक्षुभिः ॥२१॥ यत्रयत्रमनोयातिब्र
ह्मणस्तत्रदर्शनं ॥ मनसाधारणंचैवधारणासापरामता ॥२२॥ ब्रह्मैवास्मीतिसद्वृत्यानिरालं
बतयास्थितिः ॥ ध्यानशब्देनविख्यातोपरमानंददायिनी ॥२३॥ निर्विकारतयावृत्याब्रह्मा
कारतयापुनः ॥ वृत्तिविस्मरणंसम्यक्समाधिर्ज्ञानसंज्ञकः ॥२४॥ इमंचाकृत्रिमानंदंतावत्
साधुसमभ्यसेत् ॥ वश्योयावत्क्षणात्पुंसोप्रयुक्तःसन्स्वयंभजेत् ॥२५॥ ततःसाधननि
र्मुक्तःसिद्धोभवतियोगिराट् ॥ तत्स्वरूपंनचैतस्यविषयोमनसोगिरां ॥२६॥ समाधौक्रियमा
णेतुविघ्नान्यायांतिवैबलात् ॥ अनुसंधानराहित्यंआलस्यंभोगलालसं ॥२७॥ लयस्तमश्च
विक्षेपस्तेजःस्वेदश्चशून्यता ॥ एवंयद्विघ्नबाहुल्यंत्याज्यंब्रह्मविदाशनैः ॥२८॥ भाववृत्याहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावत्वं शून्यवृत्त्याहि शून्यता। ब्रह्मवृत्त्याहि पूर्णत्वं तथा पूर्णत्वमभ्यसेत्।। २१।। यहिवृत्तिं वि
हायेनां ब्रह्माख्यां पावनीं परां। ते तु वृथैव जीवंति पशुभिश्च समानराः।। २०।। ये तु वृत्तिं विजा
नंति ज्ञात्वापि वर्धयंति ये। ते वै सत्पुरुषा धन्या वंद्यास्ते भुवनत्रये।। २१।। येषां वृत्तिः समावृ
द्धा परिपक्वा च सा पुनः। ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः।। २२।। कुशला ब्रह्मवर्त्ती
यां वृत्तिहीनाः सुरागिणः। तेप्यज्ञानत्तमा नूनं पुनरायंति यांति वै।। २३।। निमिषार्धं नति
ष्ठंति वृत्तिं ब्रह्ममयीं विना। यथा तिष्ठंति ब्रह्माद्याः सनकाद्याः शुकादयः।। २४।। कार्यकार
णतां याताः कारणे नहि कार्यता। कारणत्वं ततो नश्यत् कार्याभावे विचारतः।। २५।। अथ शु
द्धं भवेद्वस्तु यद्वै वाचामगोचरं। द्रष्टव्यं मृद्घटेनैव दृष्टांतेन पुनः पुनः।। २६।। अनेनैव प्र
कारेण वृत्तिर्ब्रह्मात्मिका भवेत्। उदेति शुद्धवृत्तानां वृत्तिज्ञानं ततः परं।। २७।। कारणव्य
तिरेकेण कार्यं नित्यं विलोकयेत्। अन्वयव्यतिरेकेण पुमानादौ प्रपश्यति।। २८।। कार्ये हि
कारणं पश्यत् पश्चात् कार्यं विवर्जयेत्। कारणत्वं स्वतो गच्छेदवशिष्टं भवेन्मुनिः।। २९।। भावि ।।राम।।

।।१३६।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंतीव्रयोगेन यद्दस्त निश्चयात्मना ॥ पुमांस्तद्दिभवेशीघ्रं ज्ञेयंभ्रमरकीटवत् ॥४०॥ अ
दृश्यं भावरूपंचसर्वमेतच्चिदात्मकं ॥ सावधानतयानित्यं स्वात्मानंचैवभावयेत् ॥४१॥ द
श्यंत्यद्दस्य तांनीहाब्रह्माकारेणचिंतयेत् ॥ विद्वान्नित्यमुखतिष्टत्धीयाचिद्रसपूर्णया
॥४२॥ एभिरंगैःसमायुक्तोराजयोगगुदाहृतः ॥ किंचित्पक्वकषायीनांहटयोगेणसंयुतः ॥४३॥ परि
पक्वंमनोयेषांकेवलोयंचसिद्धिदः ॥ गुरुदैवतभक्तानांसर्वेषांसुलभोजवात् ॥४४॥ तीर्थेवा
श्वपचगृहेवानष्टस्मृतिवापरित्यजं देहं ॥ ज्ञानफलकालसमयेकैवल्यंयातिविगतशोकः
॥४५॥ रथ्यांतरेमूत्रपुरीषमध्येचांडालवेश्मन्यथवाश्मशाने ॥ कृतप्रयत्नोप्यकृतप्रयत्ने दे
हावसानेलभतेचमोक्षं ॥४६॥ अतीवादांस्तितिक्षेतनावमन्येतकिंचन ॥ नचैवदेहमाश्रि
त्यवैरमन्चेतिकेनचित् ॥४७॥ नकुर्यान्नवदेत्किंचित्नध्यायेत्साध्वसाधुवा ॥ आत्मारामा
जेयावृत्त्याविचरेत्जडवन्मुनिः ॥४८॥ अकिंचनस्यदांतस्यशांतस्यसमचेतसाः ॥ मयासंतु
ष्टमनसः सर्वाःसुखमयादिशाः ॥४९॥ निर्वासनोनिरालंबः स्वछंदोमुक्तबंधनः ॥ क्षिप्तः संसा

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रवातेनचेष्टते शुष्कपर्णवत् ॥५०॥ मोक्षस्य नहि वासोस्ति न ग्रामांतरमेव वा ॥ अज्ञान हृदयग्रंथी
नाशो मोक्ष इति स्मृतः ॥५१॥ अहिमिव ज्ञानसंयोगं सर्वदा वर्जयेद्यः ॥ कुणपमिव वस्तु नारीं त्य
क्त कामो विरागी ॥ विषमिव विषयाप्तिं मन्यमानो दुरंतां ॥ जयति परमहंसो मुक्ति भावं समेति
॥५२॥ इति श्रीपरिव्राजकाचार्य विरचितो अपरोक्षानुभवः समाप्तः ॥ ॥ ॥छ॥ ॥छ॥ ॥छ॥

पृ २५

॥राम॥
॥१३७॥

८

KKSU LIBRARY
RAMTEK
441 106
M1006
Dist Nagpur

8

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=18.10.20 14:37
,TRANSFERRED=2020/10/18 at 14:40:13
,PAGES=15
,TYPE=STD
,NAME=S0004134
,Book Name=M-1006-UPROJHANUBHAV
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection